श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ विंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ विंशः सर्गः ॥

## नारदेन रावणस्य प्रबोधनं तस्य प्रेरणया रावणस्य युद्धार्थं यमलोके गमनं नारदस्य तद्विषये विचारश्च

ततो वित्रासयन् मर्त्यान् पृथिव्यां राक्षसाधिपः।
आससाद घने तस्मिन् नारदं मुनिपुङ्गवम् ॥ **7.20.1** ॥

तस्याभिवादनं कृत्वा दशग्रीवो निशाचरः।
अब्रवीत् कुशलं पृष्ट्वा हेतुमागमनस्य च ॥ **7.20.2** ॥

नारदस्तु महातेजा देवर्षिरमितप्रभः।
अब्रवीन्मेघपृष्ठस्थो रावणं पुष्पके स्थितम् ॥ **7.20.3** ॥

राक्षसाधिपते सौम्य तिष्ठ विश्रवसः सुत।
प्रीतोऽस्म्यभिजनोपेत विक्रमैरूर्जितैस्तव ॥ **7.20.4** ॥

विष्णुना दैत्यघातैश्च गन्धर्वोरगधर्षणैः।
त्वया समं विमर्दैश्च भृशं हि परितोषितः ॥ **7.20.5** ॥

किञ्चिद् वक्ष्यामि तावत् तु श्रोतव्यं श्रोष्यसे यदि।
तन्मे निगदतस्तात समाधिं श्रवणे कुरु ॥ **7.20.6** ॥

किमयं वध्यते तात त्वयावध्येन दैवतैः।
हत एव ह्ययं लोको यदा मृत्युवशं गतः ॥ **7.20.7** ॥

देवदानवदैत्यानां यक्षगन्धर्वरक्षसाम्।
अवध्येन त्वया लोकः क्लेष्टुं योग्यो न मानुषः ॥ **7.20.8** ॥

नित्यं श्रेयसि सम्मूढं महद्भिर्व्यसनैर्वृतम्।
हन्यात् कस्तादृशं लोकं जराव्याधिशतैर्युतम् ॥ **7.20.9** ॥

तैस्तैरनिष्टोपगमैरजस्रं यत्र कुत्र कः।
मतिमान् मानुषे लोके युद्धेन प्रणयी भवेत् ॥ **7.20.10** ॥

क्षीयमाणं दैवहतं क्षुत्पिपासाजरादिभिः।
विषादशोकसम्मूढं लोकं त्वं क्षपयस्व मा ॥ **7.20.11** ॥

पश्य तावन्महाबाहो राक्षसेश्वर मानुषम्।
मूढमेवं विचित्रार्थं यस्य न ज्ञायते गतिः ॥ **7.20.12** ॥

क्वचिद् वादित्रनृत्यादि सेव्यते मुदितैर्जनैः।
रुद्यते चापरैरार्तैर्धाराश्रुनयनाननैः ॥ **7.20.13** ॥

मातापितृसुतस्नेहभार्याबन्धुमनोरमैः।
मोहितोऽयं जनो ध्वस्तः क्लेशं स्वं नावबुध्यते ॥ **7.20.14** ॥

तत्किमेवं परिक्लिश्य लोकं मोहनिराकृतम्।
जित एव त्वया सौम्य मर्त्यलोको न संशयः ॥ **7.20.15** ॥

अवश्यमेभिः सर्वैश्च गन्तव्यं यमसादनम्।
तन्निगृह्णीष्व पौलस्त्य यमं परपुरञ्जय ॥ **7.20.16** ॥

तस्मिञ्जिते जितं सर्वं भवत्येव न संशयः।
एवमुक्तस्तु लङ्केशो दीप्यमानं स्वतेजसा ॥ **7.20.17** ॥

अब्रवीन्नारदं तत्र सम्प्रहस्याभिवाद्य च।
महर्षे देवगन्धर्वविहार समरप्रिय॥ **7.20.18**॥

अहं समुद्यतो गन्तुं विजयार्थं रसातलम्।
ततो लोकत्रयं जित्वा स्थाप्य नागान् सुरान् वशे॥ **7.20.19**॥

समुद्रममृतार्थं च मथिष्यामि रसालयम्।
अथाब्रवीद् दशग्रीवं नारदो भगवानृषिः॥ **7.20.20**॥

क्व खल्विदानीं मार्गेण त्वयेहान्येन गम्यते।
अयं खलु सुदुर्गम्यः प्रेतराजपुरं प्रति॥ **7.20.21**॥

मार्गो गच्छति दुर्धर्ष यमस्यामित्रकर्शन।
स तु शारदमेघाभं हासं मुक्त्वा दशाननः॥ **7.20.22**॥

उवाच कृतमित्येव वचनं चेदमब्रवीत्।
तस्मादेवमहं ब्रह्मन् वैवस्वतवधोद्यतः॥ **7.20.23**॥

गच्छामि दक्षिणामाशां यत्र सूर्यात्मजो नृपः।
मया हि भगवन् क्रोधात् प्रतिज्ञातं रणार्थिना॥ **7.20.24**॥

अवजेष्यामि चतुरो लोकपालानिति प्रभो।
तदिह प्रस्थितोऽहं वै पितृराजपुरं प्रति॥ **7.20.25**॥

प्राणिसङ्क्लेशकर्तारं योजयिष्यामि मृत्युना।
एवमुक्त्वा दशग्रीवो मुनिं तमभिवाद्य च॥ **7.20.26**॥

प्रययौ दक्षिणामाशां प्रविष्टः सह मन्त्रिभिः।
नारदस्तु महातेजा मुहूर्तं ध्यानमास्थितः॥ **7.20.27**॥

चिन्तयामास विप्रेन्द्रो विधूम इव पावकः।
येन लोकास्त्रयः सेन्द्राः क्लिश्यन्ते सचराचराः॥ **7.20.28** ॥

क्षीणे चायुषि धर्मेण स कालो जेष्यते कथम्।
स्वदत्तकृतसाक्षी यो द्वितीय इव पावकः॥ **7.20.29** ॥

लब्धसंज्ञा विचेष्टन्ते लोका यस्य महात्मनः।
यस्य नित्यं त्रयो लोका विद्रवन्ति भयार्दिताः॥ **7.20.30** ॥

तं कथं राक्षसेन्द्रोऽसौ स्वयमेव गमिष्यति।
यो विधाता च धाता च सुकृतं दुष्कृतं तथा॥ **7.20.31** ॥

त्रैलोक्यं विजितं येन तं कथं विजयिष्यते।
अपरं किं तु कृत्वैवं विधानं संविधास्यति॥ **7.20.32** ॥

कौतूहलसमुत्पन्नो यास्यामि यमसादनम्।
विमर्दं द्रष्टुमनयोर्यमराक्षसयोः स्वयम्॥ **7.20.33** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे विंशः सर्गः॥